## पत्रपूर्वादञ्। (१२२/१५०२)

पतन्ति [1]तेन [2]इति पत्रम् अश्वादिकं वाहनमुच्यते। तत्पूर्वाद् रथशब्दात् अञ् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [3]विषये। पूर्वस्य यतोऽपवादः। आश्वरथं चक्रम्। [4]औष्ट्ररथम्। गार्दभरथम्[5]॥

## पत्राध्वर्युपरिषदश्च। (१२३/१५०३)

पत्रं वाहनम्, तद्वाचिनः [6]प्रातिपदिकात् अध्वर्युपरिषच्छब्दाभ्यां च अञ् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [7]विषये। अणोऽपवादः।

[४७४] पत्राद् [8]वाह्ये। (म. भा. २.३१९)

अश्वस्य इदं वहनीयमाश्वम्। औष्ट्रम्। [9]गार्दभम्। आध्वर्यवम्। पारिषदम्॥

## हलसीराट्ठक्। (१२४/१५०४)

हलसीरशब्दाभ्यां ठक् प्रत्ययो भवति तस्येदम् इत्यस्मिन् [10]विषये। [11]अणोऽपवादः। हलस्य इदं हालिकम्। सैरिकम्॥

## द्वन्द्वाद् वुन् वैरमैथुनिकयोः। (१२५/१५०५)

द्वन्द्वसञ्ज्ञकात्[12] वुन् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [13]विषये, वैरमैथुनिकयोः [14]प्रत्ययार्थविशेषणयोः। अणोऽपवादः। छं तु परत्वाद् बाधते। वैरे तावत् – [15]बाभ्रव्यशालङ्कायनिका। काकोलूकिका। मैथुनिकायाम् – अत्रिभरद्वाजिका। कुत्सकुशिकिका। विवहनमैथुनिका। [16]वैरस्य नपुंसकत्वेऽप्यमी स्वभावतः स्त्रीलिङ्गाः।

[४७५] वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः। (म. भा. २.३१९)

दैवासुरम्। राक्षोऽसुरं वैरम्॥

## गोत्रचरणाद् वुञ्। (१२६/१५०६)

गोत्रवाचिभ्यः चरणवाचिभ्यः च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [17]विषये अणोऽपवादः। छं तु परत्वाद् बाधते। [18]गोत्रात् तावत् – [19]ग्लौचुकायनकम्। औपगवकम्[20]।

[४७६] चरणाद् धर्माम्नाययोरिष्यते।

काठकम्। कालापकम्। मौदकम्। पैप्पलादकम्॥

---

1. इत्यनेन फ. 2. इदं क. 3. अर्थे ह. 4. नास्ति फ 5. रासभरथम्। छं परत्वात् बाधते इत्यधिकम् ड. 6. शब्दात् फ. 7. अर्थे ह. 8. वहनीये ड, वाह्य एव ग. 9. नास्ति फ. 10. अर्थे ह. 11. अणोऽपवादः नास्ति फ. 12. प्रातिपदिकात् इत्यधिकम् फ. 13. अर्थे ह. 14. अर्थविशेषणयोः इ. 15. बाभ्रवशालङ्कायनिका ब.क.फ, बाभ्रवशालङ्किका इ. 16. वाक्यमिदं नास्ति ब.फ.ह. 17. अर्थे फ. 18. गोत्रान्तात् ब. 19. गौचुकायनम् क. 20. कापटवकम् इत्यधिकम् फ. ह.